**राजकुमारं चन्द्रापीडं प्रति मन्त्रिणः शुकनासस्य उपदेशः संक्षेपेण समुपवर्ण्यताम् ?**

<u>**उ.**</u> संस्कृतसाहित्याकाशे कविकुलललामभूतस्य वाणीवरपुत्रस्य वाणभट्टस्य अनन्या कीर्तिः हि कादम्बरीनामकं कथाजातीयं गद्यकाव्यम्। अस्य गद्यकाव्यस्य "शुकनासोपादेशः" इत्यंशे महाकविना वाणभट्टेन उज्जयिनीराजस्य तारापीडस्य हितैषिणः मन्त्रिणः शुकनासस्य उपदेशावली अतीव चारुतया उपस्थापिता। तारापीडः यदा राजकुमारं चन्द्रापीडं यौवराज्ये अभिषेक्तुम् इच्छति तदा प्राज्ञः मन्त्री शुकनासः चन्द्रापीडं सकलशास्त्रेषु निपुणं ज्ञात्वापि अधिकतरं विनीतं कर्तुम् उपदेशं प्रदत्तवान्।

चन्द्रापीडः वयसा अतीव नवीनः। अस्मिन् समये मोहाच्छन्ने हृदये अहंकारस्य आविर्भावः जायते। अपि च, यौवनं, रूपं, शक्तिः, प्रभुत्वं चेति गुणसमूहः अनर्थकरः। एतेषाम् एकत्र समावेशे फलं भयङ्करं स्यात्। तदुक्तम् -

**" यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।**
**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥" इति**

राजकुमारस्य चन्द्रापीडस्य बुद्धिः अधुनापि निर्मला, विषयवुद्धिः च तस्य हृदयं कलुषितं न करोति। अतः चन्द्रापीडस्य सतर्ककरणाय एव मन्त्रिणः शुकनासस्य अयम् उपदेशदानप्रयासः। मन्त्री शुकनासः प्रथमे लक्ष्म्याः चरित्रविषये, ततश्च राजसभायाम् अवस्थितस्य स्वार्थसिद्धिपरायणस्य धूर्तगणस्य स्वभावविषये उपदेशं प्रदत्तवान्। चञ्चलता हि लक्ष्मीस्वभावस्य अन्यतमं वैशिष्ठम्। सा कुत्रापि स्थिरा स्थातुं न

पारयति। मधुकरः इव तस्याः स्वभावः वर्तते। सहस्रयोद्धृणां कृपाणे वन्दीकृतापि सा न तिष्ठति। पद्मवने मृणालकण्टकेन क्षता भूत्वा कुत्रापि सा पदद्वयं स्थापयितुं न इच्छति। क्षणप्रभा इव सा क्षणस्थायिनी। तस्याः लाभः यथा दुस्करः तथैव सयत्नं तस्याः रक्षणम् अतीव दुस्करं कर्म। कुलम्, शीलम्, आभिजात्यम्, विद्यावत्तां, स्वभावचरित्रं चेत्यादि किमपि प्रति तस्याः नास्ति अभिलाषः। तदुक्तं कविना -

**" न परिचयं रक्षति, नाभिजनमीक्षते, न रूपमालेकयते, न कुलक्रमम् अनुवर्तते, न शीलं पश्यति, न वैदग्ध्यं गणयति..." । इति**

विविधसमयेषु विविधरूपधारणार्थम् एव सा विश्वरूपधारिणः नारायणस्य मूर्तिम् आश्रयति -

**" विश्वरूपत्वमेव् ग्रहीतुम् आश्रिता नारायणमूर्तिम्" इति ।**

दुष्ट-पिशाची इव इयं राजलक्ष्मीः मानवानाम् उन्नतिं विधाय स्वल्पजं मानवं मोहितं करोति। सा सारस्वत्या अनुगृहीतं पण्डितम् ईर्ष्यया परित्यजति, गुणवतः, वीरात्, सज्जनात् च सर्वदा दूरं तिष्ठति। ऐन्द्रजालिकः इव पस्परविरुद्धगुणस्य समावेशः तस्यां परिलक्ष्यते। अतः सा मानवानाम् उन्नतिं विधायापि नीचस्वभावम् आविष्करोति, अमृतस्य सहोदरा भूत्वापि परिणामे तिक्तताम् आनयति। उत्तमपुरुषस्य अनुरक्ता भूत्वापि खलजनान् प्रति आसक्ता जाता। पृथिव्यां नास्ति एताद्दशः कोऽपि जनः, यः खलु लक्ष्म्या प्रतारितः न भवति -

**" न हि तं पश्यामि यो ह्यपरिचितयानया न निर्भरमुपगूढः यो वा न विप्रलव्धः।" इति**

लक्ष्म्याः कृपालाभेन राजानः विवेकशून्याः जायन्ते। वाणभट्टस्य भाषायाम् -

**" राहुजिह्वा धर्मेन्दुमण्डलस्य"। इति**

एवं शनैः शनैः राज्ञां विनाशमार्गः प्रशस्तः भवति।

लक्ष्मीस्वभावस्य वर्णनात् परं स्वार्थनिष्पादनपराणां धूर्तानां स्वभावः वर्ण्यते मन्त्रिणा शुकनासेन। राजसभायां विराजमानाः धूर्ताः स्वकार्यसम्पादनाय राज्ञः दोषान् गुणरूपेण प्रतिष्ठापयन्ति। ते कथयन्ति -

**"अक्षक्रीडा आमोद इति, परस्त्रीगमनं चतुरता इति, मृगया व्यायाम् इति, मद्यपानं विलासिता इति, प्रमत्तता वीरत्वम् इति, स्वस्त्रीपरित्यागः आसक्तिहीनता" इति**।

एवं प्रतारणाकुशलाः धूर्ताः दोषान् गुणरूपेण राज्ञः समीपे व्याख्याय मनसि हसन्ति स्म। स्तावकानां चादुवाक्येन राजानः चैतन्यहीनाः भूत्वा आत्मानम् अतिमानवरूपेण मन्यन्ते। तेन ते स्वेषां चतुर्भूजं विष्णुरूपेण अथवा त्रिलोचनं महादेवरूपेण कल्पयन्ति। तेषां भुजयोः मध्ये विष्णोः अपरः भुजः लुक्कायितः अस्ति मात्रम्, ललाटस्थं तृतीयं नयनं तु चर्मावृतं वर्तते। मिथ्यामाहात्म्यस्य गर्वेण गर्विताः राजानः देवान् न प्रणमन्ति, व्राक्ष्मणानां पूजां न कुर्वन्ति, पण्डितान् उपहसन्ति, वृद्धजनस्य उपदेशं प्रलापवाक्यरूपेण मन्यन्ते। हितैषिणां मन्त्रिणां सदुपदेशे राजानः दोषम् आविष्कुर्वन्ति तथा उपदेशवाक्यस्य प्रत्याख्यानं कुर्वन्ति। परन्तु राजमन्त्रिणोः आनुकुल्ये राज्यस्य श्रीवृद्धिः स्यात्। अत एव ये खलु दिवारात्रं स्वकार्यं परित्यज्य कृताञ्जलिवद्धेन राज्ञां स्तुतिं कुर्वन्ति, राजानः केवलं तान् धूर्तान् प्रति प्रसन्नाः भवन्ति।

तेषाम् उपरि राज्ञां विश्वासः वर्तते। अतः तेभ्यः प्रचुरं धनादिकंप्रयच्छन्ति राजानः। एवं स्तावकानां मोहे आवद्धाः राजानः स्वयमेव आत्मविनाशस्य मार्गं प्रशस्तं कुर्वन्ति।

परिशेषे एतदेव कथ्यते यत् राजकुमारः चन्द्रपीडः छलनामय्या राजलक्ष्म्या तथा स्वार्थान्वेषिभिः धूर्तैः चालितः भूत्वा विपद्गामी यथा न स्यात्, तदर्थं अभिषेकान् पूर्वमेव महामन्त्री शुकनासः उपदेशप्रदानमाध्यमेन राजमुकारं सतर्कं कृतवान्।